No. ११५१ - घ

Title आत्मबोधः

Author श्री शङ्कराचार्य

Extent ११ Age

Subject वेदान्तशास्त्रम् . सम्पूर्णम्

नं० ११५१-घ

आत्मबोधः २१ प० (वेदान्तशास्त्रम्)

पत्राणि ११ (सम्पूर्णम्)

नं० **११५१** - घ

कर्त्ता श्रीशङ्कराचार्यः

नं० २२५१८
आत्मबोधः
११ पत्राणि
वेदान्तप्रकरणम्
सं० २ लि०
कर्ता श्रीशङ्कराचार्यः

अ.बो. १

श्रीगणेशायनमः॥ ज्ञानमखण्डं जिनपादं शा
न्तपद्ममनसोप्यगोचराकारं विकसितजल
रुहनेत्रं सीताछायांकमाश्रयेरामं ॥१॥ तपोभि
क्षीणपापानां शांतानांवीतरागिणां मुमुक्ष
णामपेक्षोयमात्मबोधोभविद्यतेनेबोधोन्य
साधनेभ्योहिसाक्षान्मोक्षैकसाधनं॥ पा
कस्यवह्निवत्ज्ञानंविनामोक्षोनसिध्य

राम १

ति ४॥ अविरोधितयाकर्मेना विद्यां विनि
वर्तते॥ विद्याविद्या निहंत्येवतेजस्तिमिर
संघवत्५ परिछिन्नइवाज्ञानात्तंन्नाशेस
तिकेवलः। स्वयंप्रकाशतेह्यात्मा मेघापायें
शुमानिव ६ अज्ञानकलुषंजीवंज्ञानाभ्या
साद्धिनिर्मलं कृत्वाज्ञानंस्वयंनश्येयत्जलं
कतकरेणुवत् ६ संसारस्वप्नवत्तुल्योराग

अ॰बो॰
२
४

द्वेषादिसंकुलः स्वकालेसत्यवद्भातिप्रबोधेसत्य
वद्भवेत् ७ तावत्सत्यंजगद्भातिशुक्तिकारज
तंयथा॥ यावन्नज्ञायते ब्रह्मसर्वाधिष्ठानमद्व
यं॥८॥सच्चिदात्मन्यनुस्यूतेनित्येविष्णौप्रक
ल्पिताः व्यक्तयोविविधाः सर्वाहाटकेकटका
दिवत्॥९ यथाकाशोहृषीकेशोनानोपाधि
गतोविभुः तद्भेदाद्भिन्नवद्भातितन्नाशेके

राम
२

वत्तोभवेत्॥ १० नानोपाधिवशादेवजातिना
माश्रमादयः आत्मन्यारोपितास्तोयेरसवं
र्णादिभेदवत्॥ ११ पंचीकृतमहाभूतसंभ
वंकर्मसंचितं॥ शरीरंसुखदुःखानांभोगा
यतनमुच्यते १२ पंचप्राणमनोबुद्धिदशें
द्रियसमन्वितं॥ अपंचीकृतभूतोत्थंसू
क्ष्मांगंभोगसाधनं १३ अनाद्यविद्यानि

अ.बो.
३
3

।वोऽयंकारणोपाधिरुच्यते॥उपाधिभिन्नया
त्स्वमात्मानमवधारयेत् १४ पंचकोशादि
योगेनतत्तन्मयइवास्थितः शुद्धात्मानीलवस्त्रा
दियोगेनस्फटिकोयथा १५ वपुस्तुषादिभिः
कोशैर्युक्तंयुक्त्यावघाततः आत्मानमंत
रंशुद्धंविविंच्यात्तंडुलंयथा १६ सदासर्व
गतोप्यात्मानसर्वत्रावभासते बुद्धावेवाव

राम
३

भासेतस्वच्छेषुप्रतिबिंबवत्॥१७ देहेंद्रियमनो
बुद्धिप्रकृतिभ्योविलक्षणं तद्वृत्तिसाक्षिणं
विंद्यादात्मानंराजवत्सदा १८ व्यापृतेष्विंद्रि
येष्वात्माव्यापारीवाविवेकिनां दृश्यतेभ्रेषुधा
वत्सुधावन्निवयथाशशी १९ आत्मचैतन्य
माश्रित्यदेहेंद्रियमनोधियः स्वकीयार्थेषु
वर्तंतेसूर्यालोकेयथाजनाः २० देहेंद्रियगु

अ॰बो॰
४

णात्कर्माण्यमलेसम्विदात्मनि अध्यसंसवि
वेकेनगगनेनीलत्वादिवत् २१ अज्ञानान्मा
नसोपाधेः कर्तृत्वादीनिवात्मनि कल्प्यंते
बुगतेचंद्रेचलनादियथांभसा २२ रागेछा
सुखदुःखादिबुद्धौसत्यांप्रवर्तते सुषुप्तौना
स्तितन्नाशेतस्माद्बुद्धेस्तुनात्मनः २३ प्रका
शोर्कस्यतोयस्यशैत्यमग्नेर्यथोष्णता स्वभा

एम
४

वसच्चिदानंद नित्यनिर्मलवात्मानः २४ आत्म
नः सच्चिदंशाश्चबुद्धेर्वृत्तिरिति द्वयं संयोज्यचा
विवेकेनजानामीतिप्रवर्त्तते २५ आत्मनो
विक्रियानास्तिबुद्धेर्बोधोनजात्विति जीवः
सर्वमलंज्ञात्वाकर्त्तादृष्टेतिमुह्यति २६ रज्जुस
र्पवदात्मानंजीवोज्ञात्वाभयंवहेत् नाहंजी
वःपरात्मेतिज्ञानश्चेन्निर्भयोभवेत् २७ आ

अबो
५

स्मावभासयत्येकोबुध्यादीनींद्रियाणिहि दी
पाघटादिवत्स्वात्मांजडैस्तैर्नावभास्यते २९ स्व
बोधेनान्यबोधेछाबोधरूपतयात्मनः नदी
पस्यान्यदीपेछायथास्वात्मप्रकाशने २६
निषिध्यनिखिलोपाधीन्नेतिनेतीतिवाक्यतः
विद्यादैक्यंमहावाक्यैर्जीवात्मपरमात्मनोः ३० अविद्यकंशरीरादिदृश्यंबुद्बुदवत्स

राम
५

रं एतद्धिलक्षणंविंद्यादहंब्रह्मेतिनिर्मलं ३१
देहान्यत्वान्नमेजन्मजराकार्श्यलयादयः
शब्दादिविषयैःसंगोनिरिंद्रियतयानच ३
२ अमनस्त्वांनमेदुःखरागद्वेषभयादयः
अप्राणोह्यमनाःशुभ्र इत्यादिश्रुतिशास
नात् ३३ एतस्माज्जायतेप्राणोमनः सर्वें
द्रियाणिच खंवायुर्ज्योतिरापश्चपृथ्वीवि

अ॰गी॰ ६

श्वस्यधारिणी ३४ निर्गुणो निष्क्रियो नित्यो
निर्विकल्पो निरंजनः निर्विकारो निराकारो
नित्यमुक्तोस्मि निर्मलः ३५ अहमाकाशव
त्सर्वं बहिरंतर्गतोच्युतः सदा सर्वसमः शु
द्धो निःसंगो निर्मलोचलः ३६ अहं नित्य
शुद्धविमुक्तैकमखंडानंदमद्वयं सत्यं ज्ञा
नमनंतं यत्परं ब्रह्माहमेव तत् ३७ एवं

राम ६

निरंतरं कृत्वा ब्रह्मैवास्मीति वासना हरत्य
विद्याविक्षेपान् रोगानिव रसायनं ॥ ३८ ॥ वि
विक्तदेश आसीनो विरागो विजितेंद्रियः भा
वयेदेकमात्मानं तमनंतमनन्यधीः ॥ ३९ ॥ आ
त्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः
भावयेदेकमात्मानं निर्मलाकाशवत्सदा
४० रूपवर्णादिकं सर्वं विहाय परमार्थवि

अ॰बो॰ तु परिपूर्णाचिदानंदस्वरूपेणावतिष्ठते ४१
७ ज्ञातृज्ञानज्ञेयभेदः परेनात्मनिविद्यते परा
7 नंदैकरूपत्वाद्दीप्यते स्वयमेव तत् ४२ एव
मात्मारणौ ध्यानेमथने सततं कृते उदिता
वगतिर्ज्वाला सर्वाज्ञानेंधनं दहेत् ४३ अ
ने॰ हणैव बोधेन पूर्वं संतमसे हृते तत आवि रुण ७
र्भवेदात्मा स्वयमेवांशुमानिव ४४ आत्मा

त्तु सततं प्राप्तोप्यप्राप्तवदविद्यया। तन्ना
शे प्राप्तवद्भाति स्वकंठाभरणं यथा ४५
स्थाणौ पुरुषवद्भ्रांत्या कृता ब्रह्मणि जीव
ता। जीवस्य तात्विके रूपे तस्मिन्दृष्टे निव
र्तते ४६ तत्वस्वरूपानुभवादुत्पन्नं ज्ञान
मंजसा। अहं ममेति चाज्ञानं बाधते दिग्
भ्रमं यथा ४७ सम्यग्विज्ञानवान्योगी

अ·बो·
८
8

स्वात्मन्येवाखिलंस्थितं एकंचसर्वमात्मान
मीक्षतेज्ञानचक्षुषा ४८ आत्मैवेदंजगत्स
र्वमात्मनोन्यन्नविद्यते मृदोयद्वद्घटादीनि
स्वात्म येनंसर्वमीक्ष·ते ४९ जीवन्मुक्तस्तु
तद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत् सच्चिदा
नंदरूपत्वाद्भजेद्भ्रमरकीटवत् ५० तीर्त्वा
मोहार्णवंहत्वारागद्वेषादिराक्षसान्।।योगी

राम
८

गीशांतिसमायुक्तो ओत्मारामोविराजेत ५
१ बाह्यानित्यसुखासक्तिंहित्वात्मसुख
निर्वृतः घटस्थदीपवत्स्वच्छ मंतरेवप्रकाश
ते॥५२॥उपाधिस्थोपितद्धर्मैर्नलिप्तोव्यो
मवन्मुनिः सर्वविन्मूढ वत्तिष्ठेदसक्तोवा
युवच्चरेत् ५३ उपाधिविलयाद्विष्णौनिर्वि
शेषविशेन्मुनिः जलेजलंवियद्व्योम्निसे

अ.बो.
१

जस्तेजासिवायथा ५४ यल्लाभान्नापरो
लाभोयत्सुखान्नापरं सुखं यज्ज्ञानान्नाप
रंज्ञानं तद्ब्रह्मेत्यवधारयेत् ५५ यद्दृष्ट्वाना
परं दृश्यं यद्भूत्वानपुनर्भवः यज्ज्ञात्वानापरं
ज्ञेयंतद्ब्रह्म० ५६ तिर्यगूर्ध्वमधःपूर्णंसच्चि
दानंदमद्वयं अनंतंनित्यमेकंयत्त० ५७ अ
तद्व्यावृत्तिरूपेणवेदांतैर्लक्ष्यतेव्ययं त्र

राम
१

खंडानंदमेकयत्तद्ब्रह्म· ५८ अखंडानंदरू
पस्य तस्यानंदलवाश्रिताः ब्रह्माद्यास्ता
रतम्येन भवंत्यानंदिनोलवाः ५९ तद्युक्तम
खिलवस्तु व्यवहारस्तदन्वितः तस्मात्सर्व
गतं ब्रह्म क्षीरे सर्पिरिवाखिले ६० अनण्व
स्थूलमह्रस्वमदीर्घमजमव्ययं अरूपगु
णवर्णाख्यं तद्ब्रह्म० ६१ यद्भानेभासतेर्का

अ·बो·
१०

10

दीनभास्यैर्यत्तुनभास्यते येनसर्वमिदंभा
ति॥ ६१॥ स्वयमंतर्गतेव्याप्यभासयन्नखि
लंजगत् ब्रह्मप्रकाशतेवह्निप्रतप्तायसपिं
डवत्॥ ६२ जगद्विलक्षणंब्रह्मणोन्यंनकिं
चन॥ ब्रह्मान्यद्भातिचेन्मिथ्यायथामरुमरी
चिका ६४ दृश्यतेश्रूयतेयद्यद्ब्रह्मणोन्यन्न
किंचनं तत्वज्ञानाच्चतद्ब्रह्मसच्चिदात्मानं

राम
१०

दमद्वयं ६५ सर्वगंसच्चिदात्मानंज्ञानचक्षु
र्निरीक्षते अज्ञानचक्षुर्नेक्षेतभास्वंतंभानु
मंधवत् ६६ श्रवणादिभिरुद्दीप्तोज्ञानाग्नि
परितापितःजीवःसर्वमलान्मुक्तःस्वर्ण
वद्योततेस्वयं ६७ हृदाकाशोदितोह्यात्मा
बोधभानुस्तमोपहृत् सर्वव्यापीसर्वधारी
भातिसर्वंप्रकाशते ६८ दिग्देशकालाद्यन

आबो० ॥
॥२४॥

पेक्ष्य सर्वगः शीतादिहृन्नित्यसुखं निरंजनं
यः स्वात्मतीर्थं भजते विनिष्क्रियः स सर्ववि
त्सर्वगतोमृतोभवेत् ॥६७॥ ६७॥ इति श्री
मत्परमहंसपरिव्राजकाचार्यश्रीमच्छंक
राचार्यविरचितं आत्मबोधः समाप्तः ॥ छ ॥

॥राम॥
॥२४॥